कृपया स्वपदं तेभ्यो ददात्येव कृपानिधिः ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५७ अध्यायः ॥*॥
अन्यच्च ।

श्रीभगवानुवाच ।
“अहं प्राणा वैष्णवानां मम प्राणाश्च वैष्णवाः ।
तानेव द्वेष्टि यो मूढ़ो ममात्मनां स हिंसकः ॥
पुत्त्रान् पौत्त्रान् कलत्रांश्च राजलक्ष्मीं विहाय च ।
ध्यायन्ति सन्ततं ये मां को मे तेभ्यः परः प्रियः ॥
परा भक्ता तु मे प्राणा न च लक्ष्मीर्न शङ्करः ।
न भारती न च ब्रह्मा न दुर्गा न गणेश्वरः ॥
न ब्राह्मणा न वेदाश्च न वेदजननी सुराः ।
न गोपी न च गोपाला न राधा प्राणतः प्रिया ॥
इत्येवं कथितं सर्व्वं सत्यं सारञ्च वास्तवम् ।
न प्रशंसापरं तेषां ते च प्राणाधिकाः प्रियाः ॥
मां द्विषन्ति च ये मूढ़ा ज्ञानहीनाश्च वञ्चिताः ।
स्वात्मानञ्च न जानन्ति ते यान्ति निरयं चिरम् ॥
ये द्विषन्ति च मद्भक्तान् प्राणानामधिकप्रियान् ।
तेषां शास्ताहं तूर्णञ्च परत्र निरयं चिरम् ॥
प्रभवोऽहञ्च सर्व्वेषामीश्वरः परिपालकः ।
तथापि न स्वतन्त्रोऽहं भक्ताधीनो दिवानिशम् ॥
गोलोके वाथ वैकुण्ठे द्विभुजश्च चतुर्भुजम् ।
रूपमात्रमिदं सर्व्वं प्राणा मे भक्तसन्निधौ ॥
यद्भक्तं भक्तदत्तञ्च भक्षणीयञ्च तन्मम ।
अभक्ष्यं द्रव्यमन्येन दत्तञ्चेदम्टतोपमम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २५ अध्यायः ॥
अपि च ।
“सर्व्वान् कामान् परित्यज्य दृढभक्तिञ्च साधयेत्
स एव वैष्णवाचारः कामसङ्कल्पवर्ज्जितः ॥”
इत्याचारभेदतन्त्रम् ॥ * ॥
अपरञ्च ।
“रजस्वलायाः संभोगे कर्म्मक्षेत्रे च भारते ।
त्वयोक्तञ्च भवेत् पापं नात्र स्वर्गे च सुन्दरि !
कर्म्मक्षेत्रे च तत् कर्म्म यद्वेदोक्तं शुभाशुभम् ॥
न भवेद्वैष्णवानाञ्च ज्वलतां ब्रह्मतेजसा ॥
यथा प्रदीप्तवह्नौ च शुष्काणि च तृणानि च ।
भवन्ति भस्मीभूतानि तथा पापानि वैष्णवे ॥
वह्निसूर्य्यब्राह्मणेभ्यस्तेजीयान् वैष्णवः सदा ।
रक्षितो विष्णुचक्रेण स्वतन्त्रो मत्तकुञ्जरः ॥
न विचारो न भोगश्च वैष्णवानां स्वकर्म्मणाम् ।
लिखितं साध्वि कौथुम्यां कुरु प्रश्नं हृहस्पतिम् ॥
अस्मांश्च सर्व्वे जानन्ति चन्द्रवंशांश्च वैष्णवान् ।
देवमन्यं न सेवन्ते चन्द्रवंश्या हरिं विना ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६ अध्यायः ॥
अपि च ।

सूत उवाच ।
“अथ वेण्वराजाय सोऽश्वमेधेन भूपतिः ।
ब्राह्मणेभ्यो ददौ दानं नानारूपमनेकधा ॥
जगाम वैष्णवं लोकं सकायो जगतीपतिः ।
विष्णुना सह धर्म्मात्मा नित्यमेव प्रवर्त्तते ।
एतत्ते सर्व्वमाख्यातं चरितं तस्य भूपतेः ॥
यद्देशो वैष्णवद्वेषी सर्व्वधर्म्मबहिष्कृतः ।
पृथुना पुत्त्रतीर्थेन पवित्रोऽगात् परं पदम् ॥
सत्पुत्त्रं परमं तीर्थं प्राप्य तृप्यन्ति पूर्व्वजाः ।
पितापि ऋणमुक्तः स्यात् जाते पुत्त्रे महात्मनि ॥
वैष्णवो यदि पुत्त्रः स्यात् स तारयति पूर्व्वजान् ।
पितृनधस्तना वंशास्तारयन्त्यतिपावनाः ॥”
इति पाद्मे भूमिखण्डे १२० अध्यायः ॥ * ॥
अथ वैष्णवधर्म्मतत्कर्त्तव्यपञ्चविधपूजे । यथा,—

श्रीपार्व्वत्युवाच ।
“वैष्णवानाञ्च यद्धर्म्मं कर्म्मापि तस्य तद्वद ।
यत् कृत्वा मानवाः सर्व्वे भवाम्भोधौ तरन्ति वै ॥

ईश्वर उवाच ।
अथ द्वादश शुद्धिञ्च वैष्णवानामिहोच्यते ।
गृहोपसर्पणञ्चैव तथानुगमनं हरेः ॥
भक्त्या प्रदक्षिणञ्चैव पादयोः शोधनं पुनः ॥१॥२
पूजार्थं पत्त्रपुष्पाणां भक्त्यैवोत्तोलनं हरेः ।
करयोः सर्व्वशुद्धीनामियं शुद्धिर्विशिष्यते ।३।४॥
तन्नामकीर्त्तनञ्चैव गुणानाञ्चैव कीर्त्तनम् ।
भक्त्या श्रीकृष्णदेवस्य वचसः शुद्धिरिष्यते ॥ ५ ॥
तत्कथाश्रवणञ्चैव तस्योत्सवनिरीक्षणम् ।
श्रोत्रयोर्नेत्रयोश्चैव शुद्धिः सम्यगिहोच्यते । ६ ।
७ । ८ । ९ ॥
पादोदकञ्च निर्म्माल्यं मालानामपि धारणम् ।
उच्यते शिरसः शुद्धिः प्रणतस्य हरेः पुनः ॥१०॥
आघ्राणं गन्धपुष्पादेर्निर्म्माल्यस्य तपोधने ।
विशुद्धिः स्यादनन्तस्य घ्राणस्यापि विधीयते ।११।
१२ ॥
तत्र पुष्पादिकं यच्च कृष्णपादयुगार्पितम् ।
तदेव पावनं लोके तद्धि सर्व्वं विशोधयेत् ॥*॥
पूजा च पञ्चधा प्रोक्ता तासां भेदान् शृणुष्व मे ।
अभिगमनमुपादानं योगः स्वाध्याय एव च ॥
इज्याः पञ्चप्रकारार्च्चाः क्रमेण कथयामि ते ।
तत्राभिगमनं नाम देवतास्थानमार्ज्जनम् ॥
उपलेपननिर्म्माल्यदूरीकरणमेव च । १ ।
उपादानं नाम गन्धपुष्पादिचयनं यथा ॥ २ ॥
इज्या नाम हि चेष्टादेः पूजनञ्च यथार्थतः ।३ ।
स्वाध्यायो मन्त्रराजस्य अर्थसन्धानतो जपः ॥
सूक्तस्तोत्रादिपाठश्च हरेः संकीर्त्तनं तथा ।
तन्नामशास्त्राभ्यासश्च स्वाध्यायः परिकीर्त्तितः ॥
४ ॥
योगो नाम सुदेवस्य चात्मने येव भावना ।५ ।
इति पञ्चप्रकारार्च्चाः कथितास्तव सुव्रते ॥”
इति पाद्मे पातालखण्डे १० अध्यायः ॥*॥
अथ वैष्णवानां खाद्याखाद्यम् ।
“सायं प्रातर्द्विजातीनां शूद्रभक्तमशनं तथा ।
विष्णुभुक्तावशिष्टेन दिनपापात् प्रमुच्यते ॥
अन्नं ब्रह्मा रसो विष्णुः खादयन्नाम चोच्चरन् ।
एवं ज्ञात्वा तु यो भुङ्क्ते सोऽन्नदोषैर्न लिप्यते ॥
अलावुं वर्त्तुलाकारं मसूरञ्च सवल्कलम् ।
तालं शुक्लन्तु वार्त्ताकुं न खादेद्वैष्णवो जनः ॥
वटाश्वत्थार्कपत्त्रेषु कुम्भीतिन्दुकपत्त्रयोः ।
कोविदारकदम्बे च न खादेद्वैष्णवो नरः ॥
श्रावणे वर्जयेच्छाकं दधि भाद्रपदे त्यजेत् ।
दुग्धन्तु आश्विने मासि कार्त्तिके चामिषं त्यजेत् ॥
दुग्धमन्नञ्च जम्बीरं यद्विष्णोरनिवेदितम् ।
बीजपूरञ्च शाकञ्च प्रत्यक्षलवणन्तथा ॥
यदि दैवाच्च भुञ्जन्ते तदा तन्नामकं स्मरेत् ॥
कलायं कङ्गुधान्यानि शाकञ्च हिलमोचिकाम् ।
षष्टिकाकालशाकञ्च सुस्तकं क्रमुकं तथा ॥
लवणे सैन्धवं प्रोक्तं यथा च दधिसर्पिषी ।
पयोऽनुद्धृतसारञ्च पनसाम्रे हरीतकी ॥
पिप्पलीजीरकञ्चैव नागरङ्गकतिन्तिड़ी ।
कदलीलवलीधात्रीफलान्यगुड़मैक्षवम् ।
अतैलपक्वं भुञ्जीत हविष्येषु प्रपद्यते ॥”
इति पाद्मे पातालखण्डे ११ अध्यायः ॥*॥
अथ वैष्णवलक्षणविशेषादिः ।
“माहात्म्यमथ भक्तानां यत् कार्य्यं यच्च लक्षणम् ।
करणीयं हरेर्विप्र सावधानमनाः शृणु ॥
हरिरेव सदा सेव्यो नान्यो यस्य महात्मनः ।
लोकस्य जगदाराध्यो हरिभक्तः स उच्यते ॥
अनन्यनिर्म्माल्यभुजो भक्तास्तेऽनन्यमानसाः ।
गोविन्दोपासका ये तु नित्यं देवान्तरं विना ॥
अनन्यविषयोऽनन्यहृदयोऽनन्यसेवकः ।
केवलं हरिसेवज्ञ स भक्तः परिकीर्त्तितः ॥
सत्त्व सत्त्वाश्रयं सत्त्वगुणं सेवेत केशवम् ।
योऽनन्यत्वेन मनसा सात्त्वतः समुदाहृतः ॥
सर्व्वदेवान् परित्यज्य नित्यं भगवदाश्रयः ।
एतस्तदीयसेवायां स भागवत उच्यते ॥
विहाय काम्यकर्म्मादीन् भजेदेकाकिनं हरिम् ।
सत्यं सत्त्वगुणोपेतो भक्त्या तं सात्त्वतं विदुः ॥
मुकुन्दपादसेवायां तन्नामश्रवणेऽपि च ।
कीर्त्तने च रतो भक्तो नाम्नः स्यात् स्मरणे हरेः ॥
वन्दनार्च्चनयोर्भक्तिरनिशं दास्यसख्ययोः ।
रतिरात्मार्पणे यस्य दृढ़ानन्तस्य सात्त्वतः ॥
स्मर्त्तव्यः कीर्त्तनीयश्च श्रोतव्यः पूज्य एव च ।
यस्यैको विष्णुराराध्यो वैष्णवः समुदाहृतः ॥
यथालब्धोऽपि सन्तुष्टः समचित्तो जितेन्द्रियः ।
हरिपादाश्रयो लोके विप्राः साधुरनिन्दकः ॥
निर्व्वैरः सदयः शान्तो दम्भाहङ्कारवर्जितः ।
निरपेक्षो मुनिर्वीतरागः साधुरिहोच्यते ॥
लोभमोहमदक्रोधकामादिरहितः सुखी ।
कृष्णाङ्घ्रिशरणः साधुः सहिष्णुः समदर्शनः ॥
यद्विष्णूपासना नित्यं विष्णुर्यस्येश्वरो मुने ।
पूज्यो यस्यैकविष्णुः स्यादिह लोके स वैष्णवः ।
हरेः सर्व्वावताराणां मत्स्यादीनामुपासकाः ।
तन्मन्त्रेष्टा अनन्याश्चैवैष्णवास्ते न संशयः ॥
यदिष्टो रघुनाथस्तु नृसिंहो वामनो हरिः ।
एतन्मन्त्रो वराहादिर्वासुदेवः स वैष्णवः ॥
विष्णोरुपासको दासस्तन्मन्त्रस्तदाश्रयः ।
तमाहुर्वैष्णवं लोके विष्णुसेवापरायणम् ॥
साध्वी यथा पतिं नारी नान्यं जानाति तं विना ।